श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્‌ભાગવત રસિક કુટુંબ

## UG-11.12 - દ્વિતીય સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.**
**દેવીં(મ્) સરસ્વતીં(મ્) વ્યાસં(ન્), તતો જયમુદીરયેત્.**
**નામસઙ્કીર્તનં(મ્) યસ્ય, સર્વપાપપ્રણાશનમ્.**
**પ્રણામો દુઃખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.**

**શ્રીમદ્‌ભાગવતમહાપુરાણમ્**

**એકાદશઃ સ્કન્ધઃ**

**.. અથ દ્વાદશોઽધ્યાયઃ ..**

### શ્રીભગવાનુવાચ

**ન રોધયતિ માં(મ્) યોગો, ન સાં(ઙ્)ખ્યં(ન્) ધર્મ એવ ચ .**
**ન સ્વાધ્યાયસ્તપસ્ત્યાગો, નેષ્ટાપૂર્તં(ન) ન દક્ષિણા .. ૧..**

સ્વાધ્યા + યસ્તપસ્ + ત્યાગો

**વ્રતાનિ યજ્ઞશ્છાન્દાં(વ્)સિ, તીર્થાનિ નિયમા યમાઃ .**
**યથાવરુન્ધે સત્સં(ઙ્)ગઃ(સ્), સર્વસં(ઙ્)ગાપહો હિ મામ્ .. ૨..**

યજ્ઞશ્ + છાન્દાં(વ્)સિ , યથા + વરુન્ધે ,સર્વ + સં(ઙ્)ગાપહો

**સત્સં(ઙ્)ગેન હિ દૈતેયા, યાતુધાના મૃગાઃ(ખ્) ખગાઃ .**
**ગન્ધર્વાપ્સરસો નાગાઃ(સ્) સિદ્ધાશ્ચારણગુહ્યકાઃ .. ૩..**

ગન્ધર્વાપ્ + સરસો, સિદ્ધાશ્ + ચારણ + ગુહ્યકાઃ

વિદ્યાધરા મનુષ્યેષુ, વૈશ્યાઃ(શ્) શૂદ્રાઃ(સ્) સ્ત્રિયોઽન્ત્યજાઃ .
રજસ્તમઃ(ફ્) પ્રકૃતયસ્- તસ્મિં(વ્)સ્તસ્મિન્ યુગેઽનઘ .. ૪..

સ્ત્રિયોઽન્ + ત્યજાઃ, તસ્મિં(વ્)સ્ + તસ્મિન્

બહવો મત્પદં(મ્) પ્રાપ્તાસ્- ત્વાષ્ટ્રકાયાધવાદયઃ .
વૃષપર્વા બલિર્બાણો, મયશ્ચાથ વિભીષણઃ .. ૫..

ત્વાષ્ટ્ર + કાયા + ધવાદયઃ

સુગ્રીવો હનુમાનૃક્ષો, ગજો ગૃધ્રો વણિક્પથઃ .
વ્યાધઃ(ખ્) કુબ્જા વ્રજે ગોપ્યો, યજ્ઞપત્ન્યસ્તથાપરે .. ૬..

યજ્ઞ + પત્ન્યસ્ + તથાપરે

તે નાધીતશ્રુતિગણા, નોપાસિતમહત્તમાઃ .
અવ્રતાતપ્તતપસઃ(સ્) સત્સં(ઙ્)ગાન્મામુપાગતાઃ .. ૭..

નાધી + તશ્રુતિગણા, નોપા + સિત + મહત્તમાઃ

અવ્રતા + તપ્ત + તપસઃ(સ્),સત્સં(ઙ્)ગાન્ + મામુપા + ગતાઃ

કેવલેન હિ ભાવેન, ગોપ્યો ગાવો નગા મૃગાઃ .
યેઽન્યે મૂઢધિયો નાગાઃ(સ્), સિદ્ધા મામીયુરઞ્જસા .. ૮..

મામી + યુરઞ્જસા

યં(ન્) ન યોગેન સાં(ઙ્)ખ્યેન, દાનવ્રતતપોઽધ્વરૈઃ .
વ્યાખ્યાસ્વાધ્યાયસં(ન્) ન્યાસૈઃ(ફ્), પ્રાપ્નુયાદ્ યત્નવાનપિ .. ૯..

વ્યાખ્યાસ્ + વાધ્યાય + સં(ન્)ન્યાસૈઃ(ફ્)

રામેણ સાર્ધં(મ્) મથુરાં(મ્) પ્રણીતે,
શ્વાફલ્કિના મય્યનુરક્તચિત્તાઃ .
વિગાઢભાવેન ન મે વિયોગ-
તીવ્રાધયોઽન્યં(ન્) દદૃશુઃ(સ્) સુખાય .. ૧૦..

શ્વા + ફલ્કિના , મય્યનુ + રક્તચિત્તાઃ , તીવ્રા + ધયોઽન્યં(ન્)

તાસ્તાઃ(હ્) ક્ષપાઃ(ફ્) પ્રેષ્ઠતમેન નીતા,

મયૈવ વૃન્દાવનગોચરેણ .

ક્ષણાર્ધવત્તાઃ(ફ્) પુનરં(ઙ્)ગ તાસાં(મ્)

હીના મયા કલ્પસમા બભૂવુઃ .. ૧૧..

વૃન્દા + વન + ગોચરેણ, ક્ષણાર્ધ + વત્તાઃ(ફ્)

તા નાવિદન્ મય્યનુષં(ઙ્)ગબદ્ધ-

ધિયઃ(સ્) સ્વમાત્માનમદસ્તથેદમ્ .

યથા સમાધૌ મુનયોઽબ્ધિતોયે,

નદ્યઃ(ફ્) પ્રવિષ્ટા ઇવ નામરૂપે .. ૧૨..

મય્ય + નુષં(ઙ્)ગ + બદ્ધ ,

સ્વમાત્મા + નમદસ્ + તથેદમ્ , મુનયોઽબ્ + ધિતોયે

મત્કામા રમણં(ઞ્) જાર- મસ્વરૂપવિદોઽબલાઃ .

બ્રહ્મ માં(મ્) પરમં(મ્) પ્રાપુઃ(સ્) સં(ઙ્)ગાચ્છતસહસ્રશઃ .. ૧૩..

મસ્વરૂપ + વિદોઽબલાઃ,

સં(ઙ્)ગાચ્છત + સહસ્રશઃ

તસ્માત્ત્વમુદ્ધવોત્સૃજ્ય, ચોદનાં(મ્) પ્રતિચોદનામ્ .

પ્રવૃત્તં(ઞ્) ચ નિવૃત્તં(ઞ્) ચ, શ્રોતવ્યં(મ્) શ્રુતમેવ ચ .. ૧૪..

તસ્માત્ + ત્વમુદ્ + ધવોત્ + સૃજ્ય

મામેકમેવ શરણ-માત્માનં(મ્) સર્વદેહિનામ્ .

યાહિ સર્વાત્મભાવેન, મયા સ્યા હ્યકુતોભયઃ .. ૧૫..

સર્વાત્ + મભાવેન

ઉદ્ધવ ઉવાચ

સંશયઃ(શ્) શૃણ્વતો વાચં(ન્), તવ યોગેશ્વરેશ્વર .

ન નિવર્તત આત્મસ્થો, યેન ભ્રામ્યતિ મે મનઃ .. ૧૬..

श्रीभगवानुवाच

સ એષ જીવો વિવરપ્રસૂતિઃ(ફ઼્),
પ્રાણેન ઘોષેણ ગુહાં(મ્) પ્રવિષ્ટઃ .
મનોમયં(મ્) સૂક્ષ્મમુપેત્ય રૂપં(મ્),
માત્રા સ્વરો વર્ણ ઇતિ સ્થવિષ્ઠઃ .. ૧૭..

વિવ + રપ્રસૂતિઃ(ફ઼્) , સૂક્ષ્ + મમુપેત્ય

યથાનલઃ(ખ્) ખેડનિલબન્ધુરૂષ્મા,
બલેન દારુણ્યધિમથ્યમાનઃ .
અણુઃ(ફ઼્) પ્રજાતો હવિષા સમિધ્યતે,
તથૈવ મે વ્યક્તિરિયં(મ્) હિ વાણી .. ૧૮..

ખેડ + નિલબન્ધુ + રૂષ્મા, દારુણ્ + યધિમથ્ + યમાનઃ

એવં(ઙ્) ગદિઃ(ખ્) કર્મ ગતિર્વિસર્ગો,
ઘ્રાણો રસો દૃક્ સ્પર્શઃ(શ્) શ્રુતિશ્ચ .
સઙ્કલ્પવિજ્ઞાનમથાભિમાનઃ(સ્)
સૂત્રં(મ્) રજઃ(સ્) સત્ત્વતમોવિકારઃ .. ૧૯..

ગતિર્ + વિસર્ગો, સઙ્કલ્પ + વિજ્ઞાન + મથાભિમાનઃ(સ્) ,સત્ત્વ + તમો + વિકારઃ

અયં(મ્) હિ જીવસ્ત્રિવૃદબ્જયોનિ-
રવ્યક્ત એકો વયસા સ આદ્યઃ .
વિશ્લિષ્ટશક્તિર્બહુધેવ ભાતિ
બીજાનિ યોનિં(મ્) પ્રતિપદ્ય યદ્વત્ .. ૨૦..

જીવસ્ + ત્રિવૃદબ્ + જયોનિ, વિશ્લિષ્ટ + શક્તિર્ + બહુધેવ

યસ્મિન્નિદં(મ્) પ્રોતમશેષમોતં(મ્)
પટો યથા તન્તુવિતાનસં(વ્)સ્થઃ .
ય એષ સં(વ્)સારતરુઃ(ફ઼્) પુરાણઃ(ખ્)

**કર્માત્મકઃ(ફ્) પુષ્પફલે પ્રસૂતે .. ૨૧..**

પ્રોત + મશેષ + મોતં(મ્) , તન્તુ + વિતાન + સં(વ્)સ્થઃ

**દ્વે અસ્ય બીજે શતમૂલસ્ત્રિનાલઃ(ફ્)**

**પં(ગ્)ચસ્કન્ધઃ(ફ્) પં(ગ્)ચરસપ્રસૂતિઃ .**

**દશૈકશાખો દ્વિસુપર્ણનીડસ્-**

**ત્રિવલ્કલો દ્વિફલોઽર્કં(મ્) પ્રવિષ્ટઃ .. ૨૨..**

શતમૂલસ્ + ત્રિનાલઃ(ફ્), પં(ગ્)ચરસ + પ્રસૂતિઃ , દ્વિસુપર્ણ + નીડ

**અદન્તિ ચૈકં(મ્) ફલમસ્ય ગૃધ્રા,**

**ગ્રામેચરા એકમરણ્યવાસાઃ .**

**હં(વ્)સા ય એકં(મ્) બહુરૂપમિજ્યૈર્**

**માયામયં(મ્) વેદ સ વેદ વેદમ્ .. ૨૩..**

એક + મરણ્ય + વાસાઃ , બહુરૂ + પમિજ્યૈર્

**એવં(ઙ્) ગુરૂપાસનયૈકભક્ત્યા**

**વિદ્યાકુઠારેણ શિતેન ધીરઃ**

**વિવૃશ્ચ્ય જીવાશયમપ્રમત્તઃ (સ્)**

**સમ્પદ્ય ચાત્માનમથ ત્યજાસ્ત્રમ્ .. ૨૪..**

ગુરૂપા + સનયૈ + કભક્ત્યા, જીવા + શયમ + પ્રમત્તઃ(સ્) ,ચાત્મા + નમથ

**ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં**

**સંહિતાયામેકાદશસ્કન્ધે દ્વાદશોઽધ્યાયઃ .. ૧૨..**

**ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે**

**પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.**

**ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ**

